Shri Raghunatha Temple MSS. Library,
JAMMU

No. २१३/घ

Title कुवलयानन्दीय विषमपद व्याख्या षट्पदानन्दः

Author नागेशभट्टः

Extent ३८ पत्र Age

Subject अलङ्कारशास्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

कुवलयानंदीयविषमपदव्याख्या

षट्पदानंदाख्या

॥ २१३

33 पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

६३

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः गौरीचरणपंकजमित्यंशे परिणामः अमरीत्यादिविशे
१ षणस्य साभिप्रायत्वात्परिकरः कवरीभारे सौगंध्यादागतात्भ्रमर्य इत्यर्थः सु
रांगनातिष्ठ गौरीविषयकभावः कविनिष्ठं तेपुंछातीति प्रेयोलंकारोपिः पर
1 स्परेति. परस्परं तपः संपदः फलायितं परस्परं पयोरितिविग्रहः मातृत्वादि
कं च मापेश्वरकार्मत्वाज्जगतः जायापती गौरीशिवौ. उद्भूयेति. योगलक्ष
णाकलमात्रदयं पुंडरीकमुकुलं उद्भूयाद्याधोमुखतपाविद्यमानं प्राणापा राम०
नवलेनोर्ध्वमुखं विकसितं च कृत्वा योगिभिश्चिरकालं यथारुचि गम्यमा १

© Dharmartha Trust J&K. Digitized by eGangotri

णोयेविरतंसर्वदापरिपूर्णरूपएवापरिछिन्नरूपएनस्फुरति: प्रकाशतेइ
तिविरोधाभासः भासात्म्यातिशयेनपरिहारः रत्नांतराद्यपेक्षयाव्यतिरेकः
श्रेयः विगलितवेद्यांतरमानंदंमुक्तिंचदिशत्वित्यन्वयः अलंकारेघित्सुभ
यान्वयि: प्रापस्तएवेति· लिरव्यतइतिशेषः व्यंग्यमर्पणादिनेतिप्राधान्ये
नेत्यादि: क्षिपइवशब्देनसहलोपादिति अत्रधर्मलोपरैछिकः नयनपो
एनेदात्मकतमाकर्षंतीति तदुपादानस्यापिसंभवादिति· विशेषणसाम
र्थ्यादिति· अन्यथास्मरवध्वरतिमात्मनइछतीत्यपिसंभाव्येतेत्यर्थः एवं

© Dharmartha Trust J&K. Digitized by eGangotri

स्मादपिविच्छित्तिविशेषेति· उपमेयतायाअपिपर्वमप्राप्तोपमानतिरस्कारा
२ धिक्यादितिभावः मुधायवादइतिष्टथानिंदेत्यर्थः अत्यंतासंभावितत्वेननिं
दनीयनिंदामतीतैर्वैपर्थ्ये अपवादस्तुनिंदायामाज्ञाविस्रंभयोरपीतिविश्व २३
वचनीयंलोकापवादःचंद्रज्योत्स्नेति· सिकतामपेचंद्रज्योत्स्नावछूतेतदइ
त्यर्थः अत्रत्वंइत्यपुष्टार्थः शारदसर्गाचंद्रलासरिणकंवा· वादरूपंघृतं· वर्त्ती
तिवर्त्तमानसामीप्येलट्· वेधाद्वैधेति· कांताधर्मिकत्वकनकधर्मित्वत्वरूप राम०
विधाद्वयं· भ्रमंवत्त्वंवदनिष्ठाननुबंधिसुखसाधनत्वभ्रमं सपकेतनेस्येति· २

© Dharmartha Trust J&K. Digitized by eGangotri

कामस्यसमुद्गस्येत्यर्थः परिणामः क्रियेति॰ विषयतादात्म्याध्यवसायविषयता
रूपाविषयात्मत्वपरिणातिः प्रकृतकार्योपयोगितावच्छेदिकासपरिणामइत्य
र्थः अत्र प्रकृतकार्योपयोगिताविषयात्मनैव स्वात्मनानुरूलोपयोगितावोध्या
॰चंद्रलोकेतुपरिणामोनयोर्यस्मिन्नभेदः पर्यवस्यति॰ कांतेनदृष्टाश्मिमोन
मेवोत्तरंददाविस्युक्तौ॰ अत्रैव शद्वव्यवधानाद्विलंवितामभेदप्रतीतिरितिशर
दागमे॰ आतरंनाविकायेति॰ आतरस्तरणावेतनंव्यामंतिर्मकप्रसारितभुज
द्रुमांतरालं॰ वद्धधोल्लेखनंनानाधर्मप्रकारकज्ञानविषयीकरणं॰ महान्तु

© Dharmartha Trust J&K. Digitized by eGangotri

३

हरिरिति·गुरुहरित्यस्यविवरणांमहानिति· गुरुर्मदइतिवाच्यवदितिविश्वः महान्यद्गु
रितिपाठः सुगमएव· एवंकीर्त्तिविषयेर्जुनोधवलइतिवत्यार्थइत्यस्यधनु
र्विषयेभीष्मोभीषणइतिवद्गांगेयइत्यस्येत्यपिबोध्यं· भीष्मस्तुभीषणोहदे
गांगेमेचंनिशाचरइतिविश्वः गाढत्नस्मरतीत्यर्थः· दिव्यानामपीति·पुरस्ता
दित्यग्रेइत्यर्थेकेउद्दीस्येत्यनेनान्वेति· यद्वादिविभवानामप्सरसामप्यग्रेक्ष
तविस्मयामित्यर्थः अप्सरः संनिधानेपिजनिताश्चर्यामितिसौंदर्यातिशयः राम०
जीवतगदहरणाइति· जीवनंजलंप्राणासंयोगः स्वकरणाव्युत्पत्त्याधनंवा· उ ३

© Dharmartha Trust J&K. Digitized by eGangotri

न्नता ऊर्ध्वमुखाउद्धृताश्च· घटीयंत्रं राहट इति भाषायां प्रसिद्धं· स्वपकृतिरि
तिनेंद्रिरिति जयदेवस्तु· हेतुत्प्रेक्षावह्न्यस्मान्युक्त्येकस्याकृधारणां नेंदुर्नो
कोपं मौर्वाग्निः सागराद्युत्थितोदद्रुतः· अभिमानोविचार अत्र हूहितार्थनिषेध
कृतइं दुर्पदिकथं तीव्रः स्त्र्योपदिकेथं निशीति लक्षणाविवेचनानसंदेहत्वमि
मानावारः· लक्षणात्वं च इत्यादि लक्षणांमरिकाव्यस्याकुर्मे नीषिणाः स्वर्णपत्रो
र्णाभालत्वमप्रमतीवमदीभज इत्यादि तेनैवोक्तं· भ्रुवोरंतरालस्थरोमावर्त्तः प
त्रोर्णासचचक्रवर्त्तिलक्षणां· मंथानमस्मीति· मंथनदंडरूपपर्वतमस्व स्थि

© Dharmartha Trust J&K. Digitized by eGangotri

४ तपाषाणसहस्रघर्षणजन्यव्रणस्यचिन्हमित्यर्थः भ्रांतिवारणो इति· कारणे
त्पुद्भ्रांतिवारके तत्त्वाख्याने सतीत्यर्थः· एवं च तत्त्वकथनपूर्वकभ्रांतिविषयनि
५ षेधः स इति लक्षणं· अत एव वंद्या लोके भ्रातापह्नुतिरित्यन्यशंकपातथ्यनि
र्णय इत्युक्तं· अन्येनान्यस्मिन्नाशंकमाने यत्र तथ्यो तत्त्यानिर्णयः स तत्रेमामि
ति शरदागमे· पूह इति· अर्धचरिः नागरिकेति· नागरकेत्तु चितं म्रावीण्ये
वुञो विधानात्· प्रावीण्यापाविवक्षायां अध्यात्मादित्वाट्ठत्यर्थे वाठः प्रियविरह राम०
जन्मेति· चवज्योंविड्डीहिर्व्यधिकरणो जन्माद्युत्तरपदः इति वामनः केकेति ४

© Dharmartha Trust J&K. Digitized by eGangotri

उदासीनान्यस्य जातशंकावारकतात्विकवस्तुनिषेध इतिलक्षणं · इदमर्पयो

जनयेति · अन्यकर्त्रादिकतयाविवक्षितस्यार्थस्याविवक्षितान्यकर्त्तृकतया

कथनेनेत्यर्थः पतेत्वन्मपत इति · भवस्याःकुतत्वेइत्यर्थः अभवत्कुतत्वेइ

तिच हेनीलेनीलवर्णोइतिच · हेमहि किंकरोम्याज्ञापयपतेः अनिर्वचनीयत्त

वविभ्रमेः क्रीतोस्मिपत इत्यर्थः महितेः इजीतेरितिच विषयेक्यपीति · जाग्र

दवस्थावृत्तांतस्य स्वभावस्याविषयतयाकथनात् · नासौजाग्रद्वृत्तांतः किं

तु स्वाप्न इतिप्रतीतयेसाक्षितत इतिपनः सखीत्यप्रतापेत्वापस्वज्ञानगोप

© Dharmartha Trust J&K. Digitized by eGangotri

नापचेतिवोध्यं· संभावनास्यादिति· उत्प्रेक्षोन्मीपतेपत्रेरेत्वादिर्निन्हुतिंवि
५ नेतिजपदेवः तन्मुखाभेछेयति· पमगतत्वन्मुखकांतोछाहेतुनेत्यर्थइत्येके
5 ·ममछोभाकेवलंनपर्भोमेतिपमशोभागहणामतेनवैरंकरोतीत्यर्थइत्य
न्ये· स्वेछाविषयविषयकेछावत्वेनविरोधइत्यपरे· विम्बत्वरंप्रसरणशीलं·
व्यापनस्यानुपादानादिति· लिंपतिवर्षतिभ्यामन्येनेतिशेषः लिंपतिनासां
द्रमलिनीकारकत्वेनसाधारणरूपेणोपास्थापिततमोव्यापयेशक्त्योपस्थि एम०
तलेपनसंभावनान्वयः सांद्रमलिनीकारकंतमः कर्त्तृकलेपनप्रकारक ५

© Dharmartha Trust J&K. Digitized by eGangotri

संभावनाविषयइति प्राचां सिद्धांतात्· व्यंजनयोपस्थापितेव्यापनेतादृशसंभा
वनान्वयइतिमदीपकृतः अन्यत्रान्वयासंभवादिति· अन्यत्रसंभावनायां· अ
तएनस्तोरिति· आख्यातार्थस्यकर्त्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभ
वादेवेत्यर्थः किंपंति अपरिमितानीत्यर्थः आहार्यनिश्चयइतिनीलोत्पल
पदेननेत्रत्वेननेत्रोपस्थिति· तत्रचशक्त्योपस्थितस्याभेदेनान्वयइतिमतेनेदं
·वापीकापीति· वापीत्वेननाभि· गगनत्वेनमध्यं· इंद्रनीलस्तम्भस्गत्वेन
रोमाली· तद्विशेषणकांचनसोपानालीत्वेनत्रिवली· शैलत्वेनस्तनौ· अम्रन

त्वेनाधरमाधुर्यंचंद्रत्वेनमुखंनिगीर्णंतत्रत्यानांतदाश्लिष्टानांतदारूढानांचः
६ ग्रासोभिलाषः लवलीहरफारेवडीतिभाषायांप्रसिद्धा· चंद्राद्वेदइति· कोपमि
6 त्यनेनानिर्णीतत्वप्रकाशनात्प्रसिद्धस्यचनिर्ज्ञीततत्वादितिभावः सैवेतिह
पकातिरशयोक्तिरेवेत्यर्थः धवेहं· भारवाहकं· संभ्रमस्त्वादरेभये· अयोगयो
गेति· योगश्चाभेदातिरिक्तोन्यत्वाद्यनिरूपितश्चयास्य इतिपूर्वोक्तेषुनातिव्या
प्तिः सौधोस्त्रीराजसदनं· ज्यांशराश्चेति· ज्योमौर्वीपृथ्वीच· मुचतिमुंचतीति एम०
·कोशः खड्गपिधानंधनौघश्च· प्रकंपउल्लासनंप्रकृष्टकंपश्च· समासांतिः ६

© Dharmartha Trust J&K. Digitized by eGangotri

पृथ्वीच· ऊर्मिकात्वंगुलीयेस्याद्दूस्त्रभंगतरंगयोरितिविश्वः पुरोवलपानि
ऋग्निमकंकणानिपुरस्तात्प्रथमंगलितानि इत्यन्वयः कवीन्द्राणामितिः
स्खलंतस्त्रूपला इत्यर्थः ऋत्रकटास्तपातेनत्वपप्रसादोव्यंग्यः मधुराःसु
गंधरमणीयाः वीचीसरुचराः शुभ्रलशीतलत्वेसाधारणाधर्मः संजात
पत्रेति· वसंतेपूर्वपत्रगलनोत्तरंसमुत्पन्नपत्रसमरुहान्वितानि· सम्यक
जातातपत्रसमरुहान्वितानिच· विकसितपाटलवृक्षवत्वंअतिशयितपा
टलवर्णावत्वंच· श्वेतारक्तरक्तपाटलः सूर्यकरस्पर्शनविकसितानि· भासु

© Dharmartha Trust J&K. Digitized by eGangotri

८ गणाच·विभिकस्वरगणिघुतिमंति·वीनांकानांचस्वरोप्तेषुतानिवा·दिनानि
वँनीतिवापाठः परिणाहि विशालं· कदलीविशेषाः कर्पूरकदल्यः स्तिाहित
इतिविषयसप्तमी· हृत्तिर्व्यवहारः श्रीदः कुवेरः संगतानि· संगमाः घनंनि
विडंयथातथाश्मारब्धानिघनेर्मैघैरारब्धानिचेत्यर्थः काव्यादर्शकारोदंडी
सिद्धिः ख्यातेषुचेदिति·यद्यपिइयंसिद्धिस्तेनकाव्यलक्षणेषुगणितातथा
पितदुक्तलक्षणानांमलंकारतैवोचितेति दीक्षिताशयः मणिः शाणोति·श्मा एम०
णोनिकषपाषाणाः उल्लीढउल्लिखितः हेतिरायुधंस्थानानि भुक्ताणिप ८
इतितुल्ययोगिता·२

इतिदीपकं२

लिनानियामासमित्यर्थः जलनिर्मुक्ततटानीतियावत् मर्दिताञ्चुंवनालिंग
नाद्यैर्म्लापिताः तत्रतुविशेषेति तत्रतुल्ययोगितापींवर्षेत्यंवदेति दृष्टिंकरो
तिवर्षंवदाचरतिच उन्मीलंतिस्फुटंस्योर्विकासोर्थः कादंवानितस्यप्याणि
ःकुटजोद्गमाः तसुष्याणि माद्यंसोर्हृष्यंतीत्यर्थः दीपकस्येत्यस्यव्याख्यानं
अनेकेत्यादिस्थानोपस्येत्यंतं उत्कंठपति उर्ध्वकंठंकरोति उत्सुकंचकरो
ति शैलीआचरणपरिपाटी इहरकेतालमखानांरणाः दृष्टांतइति एवंच
विंवप्रतिविंवभावापन्नसाधारणधर्मकंवाक्यार्थयोरार्थमौपम्यंतत्वस्य

इत्यावृत्तिदीपकं२ इतिप्रतिवस्तूपमा२

© Dharmartha Trust J&K. Digitized by eGangotri

णां बोध्यं पदावृत्तिदीपकादिति· तदुदाहरणां वर्षत्ययं वदमालेति· कृतं च गर्वेति ८
·त्वया गर्वस्याभिमुखं न तु गर्वितं मनः कृतं च एवं एता च तैव शास्त्रादिप्रयोगं १
विनापि नोऽस्माकं द्विषो हताश्च· अन्यत्किं अपेक्षितमिति शेषः खर्जरीमंज
रीति· खर्जरीवृक्षसंबंधिमंजरीमध्ये राणीत्यर्थः जयदेवेति उपमाने तुली
ल्यादिपदाद्ये लुप्तोपमेति तेनोक्तं कामं उष्ट्र शावकं ज्योत्स्नाभस्मेति· रात्रि
रूपा कापालिन्नीति प्रधानरूपकं· छुरणां मंगलेपः अंतर्धानं स्वस्य· विषया राम०
णां च· तदेव व्यसनं तत्त्ववापथ्यसनं कौतुकं चन्द्र एव मुद्रासंपुटं तद्रूपे कपा ८

© Dharmartha Trust J&K. Digitized by eGangotri

ले· चंद्ररूपे मुद्राकपाले इत्यर्थो वा· मुद्राशब्दः प्रशस्तवाची· दीक्षाकालगृहीतो
पकरणेषु मुद्रोपपदनाम्ना व्यवहारः पाखंडानामिति चंडीदासः परिमंलेच्च
र्गों सुगंधरूपमंजनमित्यर्थो वा· विशिष्टरूपे गौक्येति· तादृशविशिष्टस्य
शाब्दव्युत्पत्त्याऽव्युत्पन्नत्वादिति भावः मतांतरे त्विति· वाक्यार्थयोरित्यस्य य
थाश्रुतार्थांगीकर्तृमत इत्यर्थः स्वकियपापरानिति· दृष्टांतस्तु तथेत्यर्थः ते
न नयनाभ्यामेनं विलोकय एतस्मिन्नयोर्विशेषं व्यनक्तीत्यादौ नातिप्रसंग
ः अत्र लिंगविधया बोधनस्य सत्त्वेपि दृष्टांततपाभावात्· उक्तं तं पदमिति

© Dharmartha Trust J&K. Digitized by eGangotri

उत्कर्षे उच्चस्थानं चेत्यर्थः रक्तत्वमिति शिलीमुखा वाणा भ्रमराश्च स्मरधनुष
९ कुसुमरूपत्वेनोभयेषामपि तन्मुक्तत्वं नापके पादतलाहतिः पद्माख्यं बंधाभि
१ प्रायेणाध्यते कपाटजघने कुर्वंत्यन्यत्स्वदाहतिं शातैः शनैर्निधुवने पद्मबंध
स्तदा मन इति अत्र सशोकत्वेनोपमेयस्य न्यूनता धनव्ययधैमुख्येन हट्टत
रं निबद्धा मुष्टिर्येन मष्टेयास्यो भागोपस्येति च कोशं भांडागारं पिधानं च म
लिनस्य कक्षस्यानुज्वलस्य च आकारतस्तद्रूपदीर्घवर्णात् आकृतेश्च अत्रे राम
दं वैलक्षण्यं न न्यूनत्वपर्यवसायि नाप्याधिक्यपर्यवसायि किंतु सर्वे विलक्षणा ९

© Dharmartha Trust J&K. Digitized by eGangotri

त्रविश्रांतमिसाङ्कः छायासंश्रयते इति तमेव सूर्यदीधितिलोकैः समं अपत्रा
चामतीत्यन्वयः श्रमः संतापातिशयकृतः खेदः ग्लानिर्बलापचयः कांतिस्ते
जोहानिः आविर्भूते तिशश्युरपेतमसामुच्यमानारात्रिरविनेशस्यकृतमु
जच्छिन्नमस्पिष्टधर्माचिर्विरोधः पतनकलुषाप्रसादं गरलतीगंगेवमोदेने
पन्मुक्तावरतनुरिपलक्ष्यत इत्यन्वयः मुखमारंभो वदनं च रक्तो रक्तवर्णो
नुरक्तश्च चुंबनसंयोगः वक्त्रसंयोगश्च व्यावल्गाकुचमिति व्यावल्गानवि
क्षेपेणासंमताच्चलन आकुलाश्चंचला इतस्ततः पर्यस्ताश्च व्यालोलादो

© Dharmartha Trust J&K. Digitized by eGangotri

१० 10 स्तापिता· प्रेंखद्ग्रावंचलाभ्यां· साभिप्राये इति· तत्वंच प्रकृतार्थोपपादक
चमत्कारिव्यंग्यकत्वं· हेत्वलंकारवारणाय व्यंग्यत्वं ध्वनिवारणाय प्रकृतार्थो
पपादकेति· उपपादकता चोपस्कारकनिष्पादकसाधारणी· उक्तंस्तः कर्ण
परेस्याक्षैरवेरचावतंसवदिति विश्वः सारातारामुधत्वेति· अत एवावपवार्थमा
त्रनिश्रांतत्वाद्दूरपदेतनपौनरुक्त्यमपि· अमुचिरक्तएमविरामत्वादिः कृ
तघ्नत्वं च उक्तमात्रादनादिकृतोपकारनाशकत्वात्· अतियजेतेतिनिजांरे एम०
वतामतिक्रम्यात्यांपदिपजेततदोभपतः लोकद्दमाच्यवतेपापवांश्चभवति १०

© Dharmartha Trust J&K. Digitized by eGangotri

स्मितिभूत गोवर्धनगिरिः अहिर्हन्त्रा सुरे सर्पे· अपि चैवेकेति अन्यथा तत्रापि
निर्हेतु रूपदोषाभावमात्रं स्यात्त्रोलंकार इति भावः नहत्वमुखत्वादीति आ
दिनास हत्वबाहुत्वसहत्वास्त्वले· गंगां· अगं गां च· अजं पद्मं चं द्रस्त्र· ह
रिणो नाहिते तति हरिणास्त्वयें गोति च· कीलालं रुधिरं जलं च· वाहिनी सेना
·नदी च· भक्ता भक्त तवेष इति· अयमेव च जयदेवेनार्थश्लेषत्वेन व्यवहृ
तः अर्थश्लेषोर्थ सार्थस्य पद्यनेकार्थ संभ्रमः कुटिलाः श्यामलादीर्घाः कृप
णाः कुंतलाश्च ते इति· चातः काकोदर इति· अदरोभयस्मन्यः काकः काकोद

© Dharmartha Trust J&K. Digitized by eGangotri

रोसर्पश्चकालिषाख्यः एतंपवित्रंनामयस्यरागाप्रसिद्धः एतनामारागोनप्रसि
११ द्धश्च· लुधव्याधसंवधिगरैः लोभयुक्तभ्रमरिम्नमरैश्च· वनंजलमरण्यंच· कम
॥ लानापद्मानांहरिणानांच· मृगप्रभेदेकमल इतिविश्वः उदयउदमाचलो
भिवृद्धिश्च· रक्तमहणांश्चनुरक्तंच· राजाचंद्रोनृपश्च· मृदुत्वंमलत्वंनवकोमल
त्वंच· कराः किरणाराजग्राह्यधनभागश्च· कामंगृठेति· अप्रकृतस्याद्वितीम
स्यशीघ्रमप्रत्ययपातगुरुत्वं· अममतीति· जरठाः कठिनाः अतिप्रवयसो राम०
जीर्णाश्च· पयोधरामेघास्तनाश्च· परिणतास्तिर्यक्दंतप्रहारिणो दिग्गा ११

© Dharmartha Trust J&K. Digitized by eGangotri

जाम्मासुताः परिणातेप्रकटे दिक्दर्शनस्संतकरिकाननखसतंचपासांताइ
तिचः मंदमस्नीति· मंदाग्नित्वंरोगः मंदश्राग्निश्च· श्वपथुः शोथः पोषश्च· तिमि
रमंधकारोदृग्दोषश्च· रेवश्चंद्रसंनिधानेकृस्नपक्षेसूर्यकांतानामधिकाग्नि
त्वं शुक्लपक्षेमंदाग्नित्वंचंद्रव्यवधानादितिलोकप्रसिद्धं· श्रंगंश्लेषइति·
व्यंजनास्वीकारेश्लेषव्यवहारोऽसंगतः स्यादितिभावः पताकाध्वजाः सौभा
ग्योत्कर्षश्च· विविक्ताविजनाः श्रवपवसंस्थानसौष्ठववंत्यश्च· सतीत्वेनप
वित्राइतिवा· वल्लीकंछादनपटलप्रांतस्त्रिवलीच· वलभीः प्रासादोपरित

© Dharmartha Trust J&K. Digitized by eGangotri

नगरहारिणि· एतस्मिन्नधिकेति· अधिकाः कपयोयासुवर्ण्यत्वेनताः अधिक
१२ जलशोभावत्यश्च· हनूमत्संबंधिवेगेनोद्धृतत्वमापन्नाः वायुसंबंधिवेगेनत
१५ रंगाकुलत्वमापन्नाश्च· रामवत्स्मरावर्णनप्रवृत्तानां· रामैः सारसैर्लक्ष्मणा
भिसारसवनिताभिश्चारहितानांसारससंबंद्धतद्वनितावतांवा· शुद्धांतेव
लभीचंद्रशालेसौधोर्ध्ववेश्मनीतिविश्वः· वलभीछादनेवक्रदारुणिच· छज्जे
र्यो तिप्रसिद्धं· अंगमयंश्लेषइति· एवंचाप्रकृतार्थोनव्यंग्यइतिभावः अभंगश्ले राम०
षइति· अमुंजपदेवः खंडश्लेषइतिव्यवजह्रुः· केचिदितिसर्वस्वकाराः अयं १२

© Dharmartha Trust J&K. Digitized by eGangotri

यं भावः सभंगस्य जतुकाष्ठन्यामेन शब्दद्वयवृत्तित्वस्य दातत्तदलंकारत्वं अभं
गस्य चैकवृंतगतफलद्वयन्यायेनार्थद्वयवृत्तित्वस्य दातत्तदलंकारत्वं यद्यपि
द्वितीयस्यापि प्रतिपत्तिनिमित्तं शब्दभेद इति तेमे शब्दद्वयवृत्तित्वमस्ति
तथापि शक्ततावच्छेदकानुपूर्व्यभेदाध्यवसानाच्छब्दद्वयवृत्तित्वज्ञानं दुःश
कमिति अन्ये इति मम्मभट्टाः तेषामयं भावः शब्दस्य परिवृत्त्यसहत्वेनान्व
यव्यतिरेकाभ्यां तदाश्रितत्वावधारणात् तत्रोभयत्राप्यनेकधर्मपुरस्का
रेणप्रवृत्तेः अनेकधर्मस्य शक्यतावच्छेदकत्वात् एकशक्यतावच्छेदकप

© Dharmartha Trust J&K. Digitized by eGangotri

रस्कारेणानेकार्थप्रतिपादनेनत्वर्थश्लेषोमयोदयमयपतेविभाकर इत्यत्रराज

१३ 13 विशेषस्त्र्योभयार्थमुदपत्तेइतिपदं इति· स्वाभिप्राय इति· अर्थमुखनिरीक्ष

कत्वादितिभावः· अनुप्रासादौतुनेवमितिवोध्यं· जटिलांव्याप्तां· पाटनं

विदारणी स्रुर्खवैघेपवालिशाइत्यमरः· अंतस्छिद्राणीति· छिद्राणिरंध्रा

णि· दोषस्थानानिच· कंटकाः क्षुद्रकाः खलाश्च· गुणास्तंतवः सौभाग्याद

यश्च· घृतः गंभीरखन्यांखनीलिमामेनतन्मंडलं मंत्रलिंगादिति· नवो राम०

नवोभवतिजायमानइत्यादिमंत्रः· एतत्सर्वंश्रुतीति· तत्सुकृतदुष्कृते वि १३

© Dharmartha Trust J&K. Digitized by eGangotri

धुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयंति · अप्रिया दुष्कृतं · तस्य पुत्रा दायमु
पयंति सुहृदः पुण्यकृत्यां द्विषंतः पापकृत्यामिति श्रुतिः यद्यपि श्रुताविवि
ति · स आदिसमागच्छति स आगच्छति विरजां नदीं तां मनसैवेत्येति तत्सुकृ
ते इत्यादि श्रुतौ विपर्ययः अर्थवशादिति पूर्वं पापादिसागाभावेऽविरजादिमा
र्गप्राप्तेरसंभवेन पाठक्रमस्य बाधादिति भावः नखधावनतोयं गंगारूपं
· वालाः पुच्छकेशाः कडंकरंवसंलीने · जैवातृकश्चंद्रः व्यवस्थापितं चित्रेति
· मुख्यतया तात्पर्यविषयत्वाभावात्प्रस्तुतेप्यस्मिन्नाभिधापर्यवसानमि

© Dharmartha Trust J&K. Digitized by eGangotri

२४ तिभाव इत्याहुः । वहंतीति । परीवाहो जलप्रणालिकादिजलनिर्गममार्गस्त
15 द्रूपाः स्रोतसः सरणिरित्यर्थः । जलोच्छ्वासाः परीवाहा इत्यमरः । यद्वा तस्या
ः परीवाहो निर्गमस्तेन यत्स्रोतः दूरदेशगामी गभीरो जलप्रवाहस्तस्य मा
र्ग इवेत्यर्थः । अंगासंगीति । हिमवालुकाकर्पूरं । परिम्लानमिति । अंतर्मध्ये
मध्यसंबंधमाप्येति संबंधः । देवंवदे इति । शरधिस्तूणीरं । व्यासः प्रष्ठो
अग्रगामी मुख्यो येषां ते वसिष्ठाद्याः । यद्वा व्यासा वेदाः । भूषापदी सर्पभूषण राम०
त्वात् । आकाशं पुष्पवाटी चंद्रगंगादीनां पुष्पतन्मालारूपत्वात् । इंद्राद्या २४

© Dharmartha Trust J&K. Digitized by eGangotri

ः वस्त्रपात्रादिगंवरत्वात् चंदनेति· स्वदगंधमदनांगरागत्वस्येति होमादि
प्रसिद्धत्वात्· व्यावस्थिताविति· विवक्षितायामित्यर्थः यद्वा इत्यादिक्रमेण
वाक्यार्थस्य व्यवस्थितो तात्पर्य इत्यर्थः अभिहिता इति· वाराद्यधिकृत
त्वादिना व्यासादिप्रतिपत्तौ समानवित्तिवेद्यत्वेन व्यासादिविनेयत्वादेरपि
तेष्ववगमादिति भावः साक्षादेव व्यासादिविनेयत्वाद्याकारेणाकिमिति
न निर्दिष्टा इत्याशंक्याह परंत्विति· यद्यप्युक्तविशेषणविशेष्यभावेपि
तत्त्वमवगम्यते तथापि स्फुटप्रतिपत्त्यर्थं तद्रूपरीसंकृतमिति भावः न

© Dharmartha Trust J&K. Digitized by eGangotri

विरमइति· एतेनकार्याद्यैः प्रसक्तौतेरुक्तैः पर्यायोक्तंप्रचक्षतेतत्त्वान्यंकुर्या
१५ 15 मासविपक्षन्नपम मनीतिजयदेवोक्तमप्यपास्तं· कर्त्तेशोर्येति· सप्ति
रश्वः सप्तसप्तिः सूर्यः सप्ताश्वाश्च· कस्त्वंवानरेइतिलेखार्थः· संदेशः· व्रीडमा
प्राप्तः पुराभवोपेनेत्यर्थः· व्यार्त्तीतीपाठांतरं· तत्रव्रीडैवार्त्तिस्ततः पराभवो
पस्येत्यर्थः· विधिरेवेति· सरलेनः· मधुरवाचा· तत्रलब्धावकाशेतित्रस्य
ह्निनस्तुतिनिंदयोस्तात्पर्यं किंतुस्वरूपकथनमात्रे इतिस्पष्टमेवप्रागुक्तं एम०
· अपिविरागित्वेइति· स्वात्मनितदनुरूपत्वसंभावनायामपिरागिणो १५

© Dharmartha Trust J&K. Digitized by eGangotri

वैराग्येपशुप्रापतेत्यर्थः आक्षेपोन्यइति· अमुंगरुदाक्षेपमारुजमदेवः अ
पीतक्षीवेति· पानंविनामत्ताः संमार्जनंविनैवनिर्मलंकतककैरादप्रक्षेपा
दिनाऽप्रसादितमसंस्कृतमपित्स्वंलघुः क्वचिच्छुद्धंवइतिपाठः दंडीति
गुणजातिक्रियादीनांयत्रवैकल्यदर्शनंविशेषदर्शनामैवसाविशेषोक्ति
रिष्यतइतिद्दितेनोक्तं।नरेंद्रानेवेति·नरेंद्रोवातिकेरणाइ्ज्ञिविषवैद्योपि
कथ्यते· सातपत्रं· आतपत्रसहितंछत्रंवाहनंचनिःसरंतिशिलीमुखा
इति· शिताः शराइतिपाठोयुक्तः शराबाणास्तलेनाध्यवसितकराःसाश्व

© Dharmartha Trust J&K. Digitized by eGangotri

उदितइति·कुवलयंकमुदं·कोर्वलयंच·नक्षत्रंताराखत्रंनभातीतिच·मुकुली
१६ भवंतिसंकुचंतिवद्धांजलीनिचभवंति· अविवेकिकुचेति·विवेकोविशेष
16 दर्शनंविश्लेषश्च·श्रुतिर्वेदः कर्णश्च· अनुरागवतीति· अनुरागोरक्तिमा
·रतिश्च·पुरःसरोग्रवर्त्तीआज्ञाकारश्च·विषंजलधरैरिति·विषंजलंह
लाहलंच·अजस्रमिति दूरदीर्घमत्यंतदीर्घं· अपारिजातांपारिजात
रहितांअपगतारिजातांच·खरखड्गेति·कंगांवलयंजलकणांच·पत्रवल्ली रम॰
मकरिकारवता·पत्रयुक्तावल्लीच·वनेपत्रवल्लीनांपरिधानात्· यद्वाउरवा १६

© Dharmartha Trust J&K. Digitized by eGangotri

तिरेकेणोर्वीरंतरामुखस्यापनेनकपोलकुचस्यपत्रवल्यात्तत्रसंक्रमः

तिलकंललाटभूषणांतिलयुक्तजलंच· मोदमज्ञानं· मोदं अनुचिंतनज

न्यविचित्तर्ती· अनिष्टस्याप्यवाप्तिरिति· अपिर्भिन्नक्रमः अनिष्टावाप्ति

रपिपत्तत्वविषममित्यर्थः अपिनाइष्टानवाप्तिः यथाश्रुतेइष्टस्याप्यवा

प्तिमतीत्यासंगति· स्पष्टेव· मंजूषामितिप्रविष्टइतिशेषः मैरकेयोराद्रु

: सिंहीपुत्रः सिंहश्च· भारभूग्नेति· विनतवाहूद्देशेनभुयत्वेविधेयेएक

प्रवृत्ताभंगः एककालेभुयत्वविततले· भुयत्वोत्तरविततत्वंचविरुद्धं· वि

© Dharmartha Trust J&K. Digitized by eGangotri

१८ 17 नतेतिपाठेपोनहृत्स्यंभुजधातोः पीडितत्वलक्षणायांविनतेतिपाठः सा
धुः विगतंततंविस्तारोयस्मादित्यर्थेवितततेत्यपिसम्यगेवः शापोपीति·म
पिपातितः शापोपिअनुग्रहसहितोभवतीत्यन्वयः अदृष्टपुत्रमुखदर्शि
नस्यैवंविधशायस्तत्कर्तृत्वात्सानुग्रहः कृष्या· कृषियोग्यां· तंप्रतीति·वि
पाकंफलं·भानुर्निशास्विति·अग्रेः सकाशादुद्धृतेसत्युदयकालेतिलौहि
त्यदर्शनात्मंदतापः सन्नक्षणोनपुनर्लौहित्येगतेतापंभजतीत्यन्वयः रम॰
अंबुजकोशएवकोशोभांडारगेहं· तस्यमुद्रासंकोचएवमुद्रामुद्रणांत १८

ड्गेन गृहीतभगवन्मुखशोभाकसुहृद्रूपभानोः किरणाहृपकारसंबंधेन भ
गवन्मुखसाम्यमयं विधुः पर्वणि लब्धापीत्यन्वयः आगमः तस्मादिवाग्नि
णादित्यं प्रविशति रात्रावादित्यस्तमिति ति श्रुतिः अहणामानुवृत्तिं परिक
ल्प्येति अग्नौ प्रवेशनमग्नौ प्रतापरूपं परिकल्प्याहृणामानमरुणामानु
वृत्तिरूपं च परिकल्प्य दर्शितमित्यन्वयः चंद्रानुप्रवेशं चेति शास्त्रसिद्धमि
ति शेषः चंद्रानुप्रवेशं च चंद्रस्पर्शरूपं परिकल्प्य दर्शितमित्यन्वयः आरोह
लारुलेति प्रथमारूढेन पश्चादारूढरुसोऽहं स्तावलंबदानं लोकप्रसिद्धं नि

© Dharmartha Trust J&K. Digitized by eGangotri

१८ टिलंललाटं॰ वद्धयामे आनिरूढः प्रसिद्धः प्रौढोपवादः स्वर्गो इति यावत॰ अंत
रंगीकृतः निगरणेन स्वमध्यस्थापितः प्राप्तं ज्ञातं॰ युक्तमित्यन्ये॰ वारणो
18 गजः निवारणं च॰ शालते॰ शोभते॰ स्यान्नते इति पाठे युक्तो न स्यादपि प्राचो
न्नतिक्रम्य प्रांतवर्त्तिपदार्थानतिक्रम्य वा प्रकारणात्वं तद्विशिष्टो रित्यर्थः॰ आं
तउत्तरदेशः गृहीतमुक्तशीलेति॰ गृहीतं मुक्तं यया सा गृहीतमुक्तरीतिः॰ नं
तार्थश्रेणिरेकावली नेत्रे कर्णांतेस्यत्र गृहीतयोर्नेत्रकर्णयोर्मध्ये कर्ण राम॰
स्याये यद्ग्रहणोपि नेत्रस्य त्यागाद्दुदाहरणाता॰ स्मरेणोस्यत्रापि एवं गृहीतस्म १८

न्तुयुक्तः स्यादेवेत्यर्थः स्याल्लते इति वा पाठः अत्रैव स्याल्लते युक्त इत्यन्वयः स्या
लः शालकः स्याल्लाजानावपतीति स्यालक इति निरुक्तं नर्मवचनमिति परि
हासवचनमित्यर्थः एवमिष्टार्थावामेमत्वेपीति· वास्तविकेष्टार्थावाप्तिमत्त्वे
पीत्यर्थः पूर्वोदाहरणायोरुक्तः अनिष्टेपि श्लेषवशादिष्टार्थत्वप्रतीतिरिति भाव
ःत्वं न खल्विति· नखलु नातीत्यर्थस्यैव स्फुटत्वं कवितात्पर्यविषयत्वं· तच्च
पितुराज्ञानलंघित्वेत्यनेन कविना स्फुटीकृतं खलु नेति पदद्वयं तु श्लेषवला
धभ्यते· एवं च विरोधालंकारसंपत्तिरपि· अत्र पक्षे तदेव निषिद्धमेवेत्यर्थः

© Dharmartha Trust J&K. Digitized by eGangotri

१९ निषिद्धस्यकरणमथचाज्ञालंघनाभाव इतिविरुद्धमित्यापाततोविरोधप्रती
१९ तिः अत्रार्थआज्ञापपितुराज्ञालंघनरूपानिष्टप्राप्तिरापाततः प्रतीयतेएक
पद्येनतुतत्परिहार इष्टावाप्तिश्चेतिदिक्. एवमितमुदाहरणंयथेति·वास्तविके
ष्टार्थावाप्तेरितिशेषः वर्णानंकल्पनमित्यर्थः तेनाधाराधेययोर्नन्तत्वाधिक
त्वेपत्रवास्तवेतत्त्वनायमलंकार इतिबोध्यं· युगांतेतिप्रतिसंहृतः स्वस्मिन्ल
यंप्रापितः आत्मास्वविवर्त्तरूपः प्रपंचेपिनेत्यर्थः अनेकत्रवर्णयत इतियुग रा०म०
पदितिशेषः तेनवक्ष्यमाणेपर्यायेनातिप्रसंगः सोकंथैरोति· क्रियाकार्यं १९

© Dharmartha Trust J&K. Digitized by eGangotri

संप्रदानव्युत्पत्तेः तदभिमवक्तार्यविरुद्धकार्यमित्यर्थः अत्र पूर्वोत्तरार्धयोः प
क्षप्रतिपक्षरूपयोर्वर्णनेति क्वचित्पाठः पूर्वपक्षोत्तरपक्षरूपयोरर्धयोः क
थनमित्यर्थः पूर्वोधत्तरार्धे पक्षप्रतिपक्षरूपकयोश्चिद्वचने इति क्वचित्पाठ
ः यथाप्राक्प्रांतेतिमयाप्राक्कारणे यथाप्रांतकारणेर्वेत्यर्थः प्राचोनतिक्र
म्यप्रांतवर्त्तिपदार्थानतिक्रम्यवाप्रकारणात्वंतद्विशिष्टेरित्यर्थः प्रांतउत्तरदे
शः गृहीतमुक्तरीत्येति गृहीतं मुक्तंयया सागृहीतमुक्तरीतिः तद्गतार्थश्रे
णिरेकावलीनेत्रे करणेनेत्यत्र गृहीतयोर्नेत्रकरणयोर्मध्येकरणस्याग्रेयग्रह

© Dharmartha Trust J&K. Digitized by eGangotri

णोपिनेत्रस्यत्यागादुदाहरणात्. स्मरेणोत्यत्रापिपूर्वंगृहीतस्मरस्याग्रेत्याग २० 20
ःइतिशारदागमे. आदौगृहीतापश्चान्मुक्तारीतिरित्यर्थः तयानिबद्धाउर्थश्रेणि
रेकावली. रीतिर्विशेषणत्वंविशेष्यत्वंवा. आद्येकर्णयोर्गृहीतविशेषणत्व
स्योत्तरत्रत्यागोनिशेष्यत्वकरणात. एवंमुत्तरोदाहरणोपूर्वंगृहीतविशेष्य
त्वस्यत्यागः उत्तरत्रविशेषणत्वकरणात. तदाह उत्तरोत्तरस्येत्यादिना. ए
वंपूर्वमधिकरणत्वादिनान्वितस्यकरणत्वादिनान्वयेपिगृहीतमुक्तरीतिः एम०
एवमप्युदाहरिष्यतेस्मरेणात्हृदयेतस्याइति. सारइत्यभिधीयतेइति. जय २०

© Dharmartha Trust J&K. Digitized by eGangotri

देवस्क्तसारोनामममदोत्कर्षः सारताच्चमथोत्तरंसारंसारस्वतंतत्रकाव्यंतत्रशि
वस्तनः सारताचोत्कर्षइत्यस्यउत्कर्षरू पासारतेसर्थः तेनापकर्षदापीसा
रोतानेतिवोध्यं· उदारसारश्चङ्गातिभिन्नोभिन्नतयागुणाः मधुरंमध्विव्या
दि· अत्रमधुकवितामाधुर्ययोः श्रौनं श्रोत्ररसनायात्वलेनभिन्नयोरप्य
भेदोवर्णितइतिशरदामः पर्यायोपदीति पर्यायश्चेदनेकस्यस्यादेकेनस
मन्वयइत्यस्यय मंमुल्केत्युदाहरणाजेपदेवोक्तंतुचित्यं· प्रातश्चरित्वेति· अ
यांजलानी· एकस्मिन्यदीति· क्रमेणातिशेषः परान्स्वदिति· अस्माकमितिना

© Dharmartha Trust J&K. Digitized by eGangotri

२१ नापिकावकृत्वाभिप्रायं दक्षिणाख्यापनं नापकः कलत्रत्वेन स्त्रीत्वसामान्यं व्यं
४ ग्यं· नश्यंतीति· पलायंते· दृष्टतः कोप्यायातीति शंकया पश्चाद्दर्शनं ततोधः
पतनं विभ्राणोति ताम्यति ग्लानिं प्राप्नोति· प्रम्लापति· प्रकृष्टांतां प्राप्नोति
·प्रेंस्वति चलति· प्रणश्यति· नैर्बल्यातिशयेन मृतप्राया भवति· गलति स्वेदा
तिशयात्त्रुट्यति· क्षीणा भवति इत्यर्थः अद्यप्राथमिकेति· अद्य प्रथममद्यप्र
थममित्यस्याभिसत इति ठनाविति ठन्· अद्यएवविकाश्वत्· एककार्यान्वमः राम०
एककार्यसाधकत्वं· प्रदानमिति· संभ्रमश्चादरः निवृत्ते कोगर्वाभावः अ २१

© Dharmartha Trust J&K. Digitized by eGangotri

भिभवोनिंदा· कस्यचित्प्रियंकत्वावाचाकथनंपरकृतोपकारस्यसभायांकथनं
च· जैत्रनेत्रेति· उत्पलाभ्यांस्रजेत्टनेत्रयोरनुगौकर्णौ अवतंसतयोपरिस्थि
ताभ्यामधोदेशवर्त्तिनौकृतौतिरस्कृतौच· पुरस्कृतेनेतिपदार्थइति· अने
कपदार्थइत्यर्थः संप्रतिनमन्मुकइतिवाक्यार्थइति· क्रियाकारकभावेना
न्वितपदसमुदायोवाक्यमितिमतेनेदं· तिङ्सुबंतचयोवाक्यमितिमते
त्वाह अनेकपदेति· विदुषीत्यस्यप्रतिनिर्देशत्वादितिप्रतियोगिनोनिर्दिष्ट
त्वादितिकचित्पाठः इत्यादिषसामान्यविशेषस्येति· विशेषधर्मावछिन्न

© Dharmartha Trust J&K. Digitized by eGangotri

२२ प्रतियोगिकभेदस्यसामान्येसत्त्वेनभेदघटितोयमेपत्वस्यवक्तुं शक्यत्वात्·
भवतिहिघटोनीलघटादन्य इति· विशेषेसामान्यस्येति· सामान्यधर्माव
च्छिन्नप्रतियोगिताकभेदस्यविशेषेसत्त्वादितिभावः नहिभवतिनीलो
घटोघटादन्यइति· उपमानतमेतिसामान्येविशेषस्येतिशेषः नत्वस्व
त्यइवतरुरित्यादौतथासामंजस्यमस्ति· अस्तोस्तवाकथंविदिवोपादाव
मक्षतेतुतदभावान्नैवसामंजस्येनप्रतीतिरितिभावः प्रतिभावेभवादिति राम०
प्रतीतिनेभवादितिपाठेप्रतीतिदार्घरूपप्रयोजनवशादित्यर्थइतिकश्चि २२

© Dharmartha Trust J&K. Digitized by eGangotri

तः सतीवेतिसत्पुरुषइवेत्यर्थः शानंददतीति अधिहृदेव्याप्तेस्वाधीनीकृतेव
अपरितुष्यताकविनेति प्रसिद्धरत्नत्वादपरितोषः उत्तरार्धेयथाकथंचि
दितिमहतामनाक्रमणोपलक्ष्यसकलजनप्रसिद्धत्वात् कर्णाहृतुदमि
तिस्वयंयथेच्छमित्यर्थकमव्ययं गाढस्वकुरु इत्यर्थः मालिन्यमजेति मे
लनतः वस्तुविशेषेपरस्परमेलनात्तयथान्यमविमलंभोग्यांतवियक्त
वकुर२ पुरुषनिष्ठोदोषावपिवैचमित्काव्येनिवद्धोविमलंभश्रृंगारध्वनिविशेषसं
पादकतयाविमलंभपरिपोषकतयाचरम्यांतिमदलंकारसंपादकतमाच

© Dharmartha Trust J&K. Digitized by eGangotri

२३ 23

गुणोभवतइत्यर्थः तद्धेतुत्वेति अतिशयहेतुत्वेत्यर्थः खलजिह्वायामिति तत्रतत्रिवेशनेसतिलोकैर्सदृष्टितितदपहारणेसर्वलोकपीडानिवृत्तिःस्यादितिभावः मिथ्याध्यवसितिरिति यद्यप्येतदुदाहरणेःनिदर्शनाप्रौढोक्तिभ्यांगतार्थेद्वितीयेत्र्असंबंधेपिमिथ्याभूततत्तत्संख्यासंबधवर्णनात तथापिमिथ्यात्वकल्पनकृतचमत्कारस्यानपह्नवनीयत्वेनपृथगलंकारता जयदेव

रामं०

कृतमिथ्यार्थाध्यवसायश्चेदसतीसाध्यसाधनेचंद्रांशुसूत्रग्रथितानभःपुष्पस्रजंवहः साधनस्यांशोःसूत्ररूपेणासत्वं साध्यनभःपुष्पाणांस्व ２३

© Dharmartha Trust J&K. Digitized by eGangotri

रूपेणैवेति॰ कल्पनात्मनाविछित्तिविशेषेणेति॰ विछित्तेर्विशेषोयस्मादिति
विछित्तिर्व्ययः निर्वेशः कामभोगः निर्वेणउपभो विशेषजनकेनेत्यर्थकं॰ कल्प
नात्मनेत्यस्यकल्पनास्वरूपेणेत्यर्थकस्यविशेषणं॰ कल्पनाविछित्तिविशेष
णेतिपाठेकल्पनाप्रमुक्तविछित्तिविशेषेणेत्यर्थः कथयामीत्यादावपितत्प्रसं
गादिति॰ संबोध्यत्वादेरसंबंधेपिवर्णनात् इतिभावः॰ वर्णनेनादावितिः॰ आ
दौ॰ पूर्वार्धे॰ अनानुरूप्यवर्णनात् अनायिदेशइति॰ त्व प्राप्तसंकेततया
इत्यंनदेति॰ आनंदजनकनिदेशादित्यर्थः॰ वांछितादधिकेति॰ संसिद्धिपदे

© Dharmartha Trust J&K. Digitized by eGangotri

२४ नतल्लाभकृतः संतोषातिशय उच्यते प्रहर्षेणेति योगार्थबलात् चातक इत्यु
25 दाहरणेपि चातकवृत्तांतस्याप्रस्तुततया तद्व्यंग्ये प्रस्तुतदातृयाचकवृत्तांते
पर्यवसानेन संतोषातिशयोस्त्येव द्वित्रिकणयाचकस्य चातकस्याधिक
जललाभसंतोषः स्यसत्वाच्च· उन्नित्य प्रथममिति मूलभागे इत्यर्थकं प्र
थममित्यव्ययं· दीपमुद्योजयेदिति· दीपाद्दीयांतरं यावदुद्योजयेत्तावन्मू
लदीपो निर्वाण इत्यर्थः परयंत्र येति· उच्चभूप्रदेशान्नीचभूभागे स्खलन एम०
संक्षोभः यद्वा रथ्यायां रथ्यागमनेन संक्षोभः संकीर्णता· यद्वा रथ्यागमनेन २४

© Dharmartha Trust J&K. Digitized by eGangotri

नापिकायाप: क्षोभ: स्वल्पमेवांबु इति। मत्स्यंकर्त्तुं मदमतीति। मदीहर्षे। विक

टतुंडदंडेतिवक्रतुंडगणपतिदंडाहतीत्यर्थः जयदेवस्त्त्व अनुज्ञामकस्मशो

भालंकारमप्याह शोभाख्यातोपिचेद्दोषोगुणाकोर्त्तिनिषिध्यतेमधानिंदति

संसारंकंसारिर्पि त्यज्यतेइत्याह संत: सच्चरितेति उदमोहद्धि: यंत्रणांस्वे

च्छाचरणनिरोध: अश्लाघश्लोकेति। राजस्त्कतिः कन्यायादोषत्वेनप्रतिभा

सतामित्यन्वय: निर्वेश: कामभोग: निर्वेणउपभोग: स्यात्। तदिच्छोरिति

कन्याविशेषणं। स्वयंवरेचेदंसखीवाक्यं। अन्याविदितंलेशतइति। अ

© Dharmartha Trust J&K. Digitized by eGangotri

न्येन तटस्थेनाविदितं यथास्यात्तथा लेशतरएव न तु स्फुटं उद्घाटनेनेत्यर्थः
२५ व्याजस्तुतौ हि सर्ववेद्यं स्फुटमेव निंदास्तुतिरूपं वागम्यत इति भेदः तत्तन्ना
षकजातीति· तत्तन्नामकेति पाठः अत्र पक्षे तन्नामप्रवृत्तिनिमित्तजातिरूप
नमित्यर्थः चतुरास्य इति· चतुरमास्यं यस्य सः चतुर्मुखो ब्रह्मा च· रत्याप्तेति· र
तावाप्तं प्रियात्प्रियं वालांछनं नखक्षतादिकं येन तस्मिन् रत्या चाप्तः प्राप्तः
प्रियः कामस्तल्लांछनं मकररूपे· कठिने· कूर्मे च· रसेन प्रिमालिंगिते रसपा राम०
लिंगिते वराहे च· प्रकृष्टाह्लादजनके नृसिंहे च· क्रमेण वृद्धिं प्राप्ते त्रिविक्रमे च· २५

© Dharmartha Trust J&K. Digitized by eGangotri

भ्र भ्रतः पर्वता राजानश्च· तेनपरशुरामे· चक्रवाकसदृशे· रामचंद्रे च· अनुकू
लनायकतयातस्यर्धिलंरोमस्य· विरहिणारामेणतेषांशापदानाद्वाभोगो
विस्तारः सुखंवासर्पशरीरंच· तेनवलरामे· शेषावतारत्वात्तस्य· श्रीकृष्णेवा·
जनितमदने देहस्त्वेपि विषयभोगाभावात्अंगाभावोजनितोयेन ताद
शेवद्वेच· अंगविरुद्धंभोगस्यागादिजनितंयेनेतिवा· इंद्रियासक्तौ त्सुक्यज
नके· अखवल्गोत्मुखेकाङ्क्षिनिच· इंद्रियासक्तपापिग्रीवाछेदकेवा· वह्निर्वि
रहजदाहोग्निश्च· समाष्टप्यी· सांतिश्च· पीडाभरसहिष्णुत्वात्· अंतःकरण

© Dharmartha Trust J&K. Digitized by eGangotri

२६ स्यविषयायारकत्वरूपशून्यताश्रयत्वादाकाशमपत्वं· उपमानोपरंजकाता
दीतिद्वंद्वः उपमानतपोपरंजकतपाचेत्यर्थः तत्रोपरंजकतारूपकविधोदा
26 हृतेषुस्पष्टा· तत्रैवेवशब्दोपादानेश्राद्याविधा· निवेशनेपीति· गुरुगणाजघ
नेनैषातरुणीमंदगामेनीत्यादाविस्याङ्कः वीरत्वदिति· पांडुपत्रंशुष्कगलितप
त्रं· इतिकेचितइति· चंद्रालोककृत्सम्मतयः द्वारमिति· खड्गिनःपशुविशेषाः
खड्गधरपुरुषाश्च· कंचुकिनःसर्पाः सौविदल्लाश्च· मदिष्योराजवनिताः प राम०
शवश्च· चिरंरागिणीतिरागोनुरागोरंगश्च गंडाभोगइतिस्वस्तीत्यादसौवक्ति २६

© Dharmartha Trust J&K. Digitized by eGangotri

को॰ अद्वैतस्पर्धिनीतिपावतः॰ प्रतिद्वंद्विना विशेषाकारेणेति॰ प्रागुल्लसितेनेति शे
षः॰ कापिरपि चेति॰ कापिशायनं मद्यं॰ सामान्यं यदीति॰ विशेषो व्यावर्त्तकधर्मः
भेदवैशिष्ट्ययोः स्फूर्त्ताविति॰ जयदेवस्तस्येतोः॰ कुतोऽपि वैशिष्ट्यास्फूर्त्तावुन्मी
लितं मतमित्याह तत्र वैशिष्ट्यपदेन भेदः साधारणधर्मो वा॰ यत्तु अनुमा
नालंकारेणागतार्थत्वादेतौ न पृथगलंकाराविति तन्न॰ नैयायिकादिसंमता
नुमितित्वजात्याक्रांतस्यैव निबंधनेऽनुमानालंकारस्वीकारात्॰ प्रकृते भेद
विशेषस्फूर्त्यो विशेषदर्शनहेतुकप्रत्ययसरूपत्वात्॰ प्रमसस्य च स्फुः संयो

© Dharmartha Trust J&K. Digitized by eGangotri

२८ गादिरूपस्वसामर्थ्ये चोपपत्तेः नैव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं· ट
त्यद्भर्गेति· अत्र लोके तद्गुणारोपस्यनेनत्र्य च तद्गुणो नास्तीति नोच्यते किं
तु तद्दीत्यादेर्व्यांतरभ्यो विस्त्राभेदानध्यवसायप्राप्तो केनापि निमित्तेन भे
दाध्यवसाय इत्येतावन्मात्रमिति न कश्चिद्दोषः ईदृक्पशसाम्युक्तत्वंप्रा
प्तो विस्तुर्नाभिपद्मपरिमलसमृद्धिंपदिनामादपिष्यदित्यन्वयः अमेस्मि
न्निति· प्रामोवाङ्कल्मतुल्मयोः इदमुन्मेषेति· जयदेन रक्तप्रश्नोत्तरक्रमोक्तौ राम·
तु स्मृतमुत्तरमुत्तरमित्याह· प्रश्नोत्तरयोः क्रमेणोक्तौ कर्त्तव्यायां प्रश्नमत २८

© Dharmartha Trust J&K. Digitized by eGangotri

ह्निख्योत्तरमेवमत्रस्फुतं तत्रायमितिशरस्यागमे· उत्तरालंकारस्यैव गूढोत्त
रास्त्यं भेदमुक्त्वा चित्रोत्तरास्त्यं भेदमाह प्रश्नोत्तरेति· प्रश्नस्य उत्तरांतरं चेत
दभिन्नमुत्तरं चित्रोत्तरपदवाच्यमित्यर्थः चित्रमिति नामैकदेशेनामग्रह
णा· केदारेत्यत्र भिन्नपदत्वेन प्रश्नः एकपदत्वेनोत्तरः· वयस्ताहरायारि· प
क्षिराक्ष· स्मपराशयेति· पराशयाभिज्ञस्येतरस्याय तत्तं प्रति साकूतं स्तामि
प्रायं चेष्टितं तत्तत्स्मालंकार इत्यर्थः नेत्राभ्यां ईषदर्पितं बोधितमोकूतं
परस्यां क्रियायां तथेत्यर्थः आपांतमिति· रथ्याप्रतोलीविशिखा· एवंपि हि

© Dharmartha Trust J&K. Digitized by eGangotri

तालंकारेपीति· सर्वाङ्गश्यामां सस्मितं प्राङ्जोषंपञ्चासित्वामथपश्यामिकांतं
२९ ५६ मित्युत्तरार्धपाठेवक्रसंदीतिपद्यएवैतत्· गूढोक्तिरिति·पदन्योद्देश्यकंतत्वेद
न्यंप्रतिकथ्यतइत्यर्थः परस्त्रेत्रादिति· सेत्रशब्दोदारपर्यायोपि· अप्रकृतार्थ
स्यप्रकृतेतिप्रकृताप्रकृतः श्लेषस्यसमावुदाप्रमिस्यादावप्रकृतस्यप्रकृतोप
मानतयाव्वपः अन्यथाऽसंतद्वार्थकत्वापत्तेः नचेष्टतथेतिभावः असंबद्धा
र्थकत्वंतुनेष्टारुतस्यकेवलमिति· नाथोमेइतिआगमोवेदः आगमनंचना राम०
गमेतिजारमात्मनामवा·वसेइति·विषादंखेदंहरंतः श्वसनंश्वासंवायुंच· २९

© Dharmartha Trust J&K. Digitized by eGangotri

गुरुर्महान्॰ देवगुरुश्च॰ बलनाशकेनबलाख्यदैत्यहंत्राच॰ अत्रश्रीकृष्ण
स्तंनिधौदृष्टेति॰ गोपेरागोगवांपरागश्च॰ किंचित्समविषमं॰ युक्तायुक्तंच
॰इहत्वपिम्रपौच॰ पतितांपतिभावंपतनंप्राप्तांच॰ विषमस्थानेषुसंकटे
षु॰ विषमेषुरणामदनेनच॰ अबलानांबलरहितानांस्त्रीणांच॰ सलेशंसल
वनंगदितइत्यन्वयः अर्थशक्तिमूलेति॰ एवंचलसरोश्लिष्टपरमुपलक्ष
णामितिभावः युक्तिःपरेति॰ मर्मगुप्तयेयक्तिपयाचेष्टपापपत्यारस्यातिसंधानं
वंचनंतदित्यर्थः जयदेवस्यानुक्तिविशेषसिद्धिःस्याद्धिचित्रार्थांतरान्वया

© Dharmartha Trust J&K. Digitized by eGangotri

२९ 29 तः नवस्त्वं नीरदः कोपि स्वर्गौर्वर्षसि यन्मुद्रारियास्त्वः वरदानमुद्राहस्तगतति
र्यक्प्रसरणरूपाकारविशेषो वरदानमुद्रा॰ अयमदेरिति अयमित्यस्यानु
वाद इत्यनेनान्वयः॰ पिङ्गापारेति॰ षड्ङ्गस्याज्ञारम्भंगमोः विकसितमल्लि
केसरादियोष्मविशेषणं॰ तस्य जेतेति धनस्येस्यर्थः॰ अशोकेनेति॰ रक्तरागा
॰ क्रूरा॰ काष्ठेनेति च॰ विकृतश्लेषेति॰ विकृतत्वं च कस्यचिद्वैणीस्यावापस्यागा
भ्यां कानुमरगाशिशुरिति॰ ध्यायेन्निसंमहेशमिति ध्यानेशिवस्यमरगहस्तत्व राम
कथनात्॰ कुरंगैरिति॰ अतिशयपिततरंगमहशासैरतिचं चलाक्षैरितियाव २९

© Dharmartha Trust J&K. Digitized by eGangotri

तः तौ संमुखमिति। रभसेन वेगेन स्खलितं मार्गप्रदानेऽवधानं सावधानत्वं प
योरित्यर्थः। भित्वरिक्कं वामदक्षिणादिक्संबंधि परस्परपार्श्वोपसर्पणं कृत्वा मु
हुर्मुहुर्मंदं मंदं वारं वारं वा। अद्यापि तिष्ठतीति। स्तनतटात्यनितंबमुत्तरीयं पुनर्ध
र्तुं प्रवृत्ताय तास्मै नयनं २ ममेति मम वाचं निशम्य परस्मितमकरोदित्यन्वम
ः नयनकमिति चक्षुश्चक्षुरित्यर्थकं लोकोक्त्या वीप्सा द्विर्वचनं तत्र नप्रगस्थितमम
न्नेत्रयोर्वंधनं माकुर्वित्यभिप्रायः। यद्वा मम नयन २ मिति तस्या वाचं निशम्य स्त
ततराज्जुरः पतितं तदीयं मुत्तरीयं धर्तुं प्रवृत्ते मयि प्रियदापत्ता स्मितमकरोदि

© Dharmartha Trust J&K. Digitized by eGangotri

स्यन्वयः नयनपदेन चक्केनेत्रपदवाच्यत्वसंबंधेन वस्त्रेलक्ष्यते· नेत्रमथिगुणेव
३०
30
स्त्रेइति विश्वः जयदेवस्तु देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः त्वंवस· हृदये
हृदयेतस्याः साक्षात्संचेय स्यसे· विप्रकृष्टनायिकामुद्दिश्य नायकं प्रति दूती
वचइदमिति भविकच्छविमलंकारांतरमाहुः भूतभाविपदं विप्रकृष्टोपलक्ष
णमितिदीक्षिताशयः उदात्तमृद्धिरितिसमृद्धिः अन्यांगश्लाघ्यचरितमोर्व
र्णानमुदात्तमित्यर्थः अनयोरितियद्येसंबंधेप्यसंबंधवर्णनरूपातिशयो एम०
क्तिः अल्पमितियथेत्युक्तिः आद्येमिथ्यामात्रं· अंत्येत्वसंतमित्येतितारत ३०

© Dharmartha Trust J&K. Digitized by eGangotri

स्यं· ईदृशैरिति· दोषापारात्रे· कर्त्तादोषाणामाकरस्थ· द्वितीयः कल्पितः नविद्य
तेनाममस्याकवेरितिगण्याभावान्ननमतीतिवायोगः प्रतिषेधइतिजयदे
वस्तुप्रतिषेधः प्रसिद्धानांकारणानामनादरः नसुद्धेनस्तुवोः स्यंदेनैववीरानि
कारिताइत्याहुः पंचमोद्दंचनेइति· पंचमस्यस्वराविशेषस्यउद्दंचनमाविष्करणं
यत्रतादृशेवसंतइत्यर्थः स्वस्यासंतेति· अकरुणात्वदुपार्थीतरतं सं मिते
नेत्यादिः अत्यंततलंव्यंग्यं· हेतोरीत्विति· जयदेवस्तुकार्यफलोपलंभस्यव्यापा
रादस्तुतोथवाश्रसानुदेतीत्याद्याहुः अस्ताविस्यत्रमानच्छेदः कार्यएषतेइत्यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

३१ पिपासाकार्यं निद्रुमं प्रवालं तत्सदृशः विगततरुच्छायस्थ· मानेनेछतीति· मानोहं

कारः स्मालेखवेनेन लज्जायालज्जास्त्यच्यते· कथंवास्वनिर्वाहइतितस्यालज्जा

31 त्स्मुयानीचसेवानिर्विस्मस्योक्तिः चरणास्पर्शायोग्यकर्तृकचरणस्पर्शांगीका

राभावः कार्यंश्चादिनाऽपथ्याशनंरोगइत्यारावुपारेपत्नानुपादपत्नपरियदः

चलारोरसेति· रसभावतदाभासभावशांतिनिबंधनाः [illegible]विति· प्रसस्क्षात्

मानोपमानशब्दार्थापत्तिश्चनुपलब्धिसंभवेतित्वानि· [illegible]सशोकादीस्था राम॰

दिनाक्रोधोत्साहभयजुगुप्सानिस्मयनिर्वेदाः विशेषइति· तत्तइसालंवनको ३१

© Dharmartha Trust J&K. Digitized by eGangotri

तादिविषयः परिपुष्ट इतराणांरास्त्वेति भावः त्रयस्त्रिंशदिति· निर्वेदग्लानिशंका
सूयामदश्रमालस्यदैन्यचिंतामोहधृतिस्मृतिव्रीडाचापलहर्षावेगजडता त्य २
गर्वविषादौत्सुक्यनिद्राविस्मृतिस्वप्नविबोधामर्षलज्जादिनाविकारगोपन
रूपावहित्थोग्रतामतिव्याध्युन्मादमरणत्रासवितर्काः देवतेत्याद्यपुष्टत्वस्या
प्युपलक्षणांमुनिर्जयतीत्यत्र नकोप्यलंकार इतिमाचार्यंयाक्तरसातिरिक्ता
लंकारोनेत्यर्थकः शांतिरसस्येति· रसोत्र भावः तादृशदिवसगमनप्रार्थनया
शांतस्यापुष्टत्वात· तिष्ठंतिस्तिमिता इति· स्तिमितास्तब्धाः उत्तरलैः गमनवेगे

© Dharmartha Trust J&K. Digitized by eGangotri

नचंचलैः अनन्तरकालं वनकुलादाभामोयं· पश्यामः किमिति· परस्पररूपल
३२ स्यादितदृष्टिसंपादनसमर्थे इत्यर्थः अन्योन्येस्यादेः सव्याजं· निमित्तांतराभि
षेणेत्यर्थः एकाभूदिति· तादृशी लोलाक्षीपरपत्तः तवप्रौढाहवाडंबरं शृण्व
तश्चैव मे एकसात्त्विकभावोदयेन सर्वांवछेदेन पुलकजननात्कुसुमायुधतूणी
रमिवाभूदयं रणोत्साहातिशयेन तिर्यक्कविटंकपालिकाकारपुलकजनना
त्जेतुर्मंगलपालिकेव· मंगलपालिका च कुशकाशादिनिर्मिता उभयपा राम०
र्श्वस्थितवसारिष्ठवद्धा मार्गपालीति प्रसिद्धा· अत्र रमणीप्रेम्णोपरिपुष्टत्वा ३२

द्रावत्वंबोध्यं॰प्रेमपदेनभावविशेषएववाल्स्यते॰कांतकांतेति॰संक्रांतनायक
मुखप्रतिबिंबे॰भयकोमलाम्लपल्लववत्सुगंधो॰निर्विवार॰तस्मिंप्रापेस्यर्थः॰अ
त्रतत्तदिंद्रियजन्यप्रत्यक्षंतत्स्मार्तक्षिप्तमलंकारः॰किंतावदिति॰एकसद्ववासिक
मलानांपरोक्षात्तत्राविद्यमानेसर्थः॰माना।प्रिपकथालापेविब्बोकोनादरक्रि
या॰यथारंध्रमिति॰अत्रयथाशब्दापस्मादित्यर्थकाः॰यथाशब्दस्तुनिर्दिष्टस्तु
ल्पयोगानुमानयोरितिविश्वः॰विद्युज्वालाभिःप्रकाशिताः॰पिंगदवर्णाश्चपु
थिकृतरुषंडेस्मरदावानलवत्व्योमव्यापिजलदध्रमवत्ज्ञादित्यादिःप्रयो

© Dharmartha Trust J&K. Digitized by eGangotri

गः पत्रैता इति· चलाचला अतिचंचलाः एतस्य कौशलं तत्वायं यथा स्यात्तथा स
३३ दापरो धावदाज्ञाकरमदनकाः मर्मभेदिबाणपतना अयमस्य व्यापारस्यानक
३३ त्वादिति प्रयोगः अतिशयेति मार्गणात्वेन कटाक्षाध्यवसानादिति भावः अ
यं कालो रव्यक्तवान् पक्षिनिलीपमानताद्याश्रयत्वात्· एवमपंचे इः कुरंगाश्र
यत्वादिति प्रयोगः इदमत्र लिंगलिंगिनोः सत्वं तत्र मन्ये ज्ञापते इत्यादिप
दानां अनुमितिबोधकत्वं यत्र तु साहस्यादिनिमित्तसद्भावस्तत्रोत्प्रेक्षा बोधा राम०
धकतेति विशेषः तारोहिणीमिति· शकटाकारां रोहिणीं जानीहीत्याति दे ३३

© Dharmartha Trust J&K. Digitized by eGangotri

शब्दवाक्यार्थज्ञानमुपमानं शकटाकारनक्षत्रपंक्तिः रोहिणीपदवाच्येत्युपमितिः अ
त्र मन्मथमिति· शैलराजो मेरुर्हिमवान्वा दरी वा· अंसे समदनशासक त्वाद्दर्प चवं
·सादृश्यविशिष्टपिंडप्रत्यक्षमुपमानमिति मतेनेदं· च्युतात्मना· स्खलितांत
ः करणेन· सर्वान्बलकृतानिति मनुस्मृतेर्बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखि
तमिति श्र्वीङ्· बलाद्दत्तमप्रतिग्राह्यादि बलाद्भुक्तं भस्म्यादि· बलाल्लेखितं शास्त्रो
क्तातिरिक्तहट्टद्धि पुत्तपत्रादि इति अरणादानव्यवहारे मनुः श्रुतिप्रसिद्धेति· श्रु
तिर्वरदेति संज्ञारूपा· लिंगं वरमुद्राधारणारूपं· इत्थं भूतः परार्थैकप्रयोजन

© Dharmartha Trust J&K. Digitized by eGangotri

३४ प्रवृत्तिकः लोलभ्रूलतयेति भ्रूचेष्टपाकलानापिकयासपत्नीदिश आगतोही
तिसूचने कृते नायकेननेति सूचं कशिरोधूननं कृतं· पुनर्नायिकयातद्वृत्तांताव
३५ दनं यथास्यात्तथा तस्यैसरोकृते सति मनस्कारोमनसस्तदुत्तरविचारपरता
कृतायेन· चित्ताभोगोमनस्कारइतिकोशः विलक्षोविगतमिषः स्थितः मिषं
गोपनोपामः व्याजोपदेशोलक्षं चेतिकोशः ततः कुद्धायां दृक्षैवपादयोर्न
तइत्यन्वयः व्यंकंवलीपानिति आगमात्स्तुत्यादितोपरि हेतुर्वल्लीयान्स्या राम०
ततदाजान्हव्यासमुद्रेन परितइतिस्पष्टमेव· अन्यथागंगौघेनतिरस्कृतं ३४

© Dharmartha Trust J&K. Digitized by eGangotri

तदस्तदृशंशंभुकंठवर्णंनीलंकथंस्यादिसन्वयः अर्णः जलं अभ्रस्तत्पूर्वं
मिति ईश्वरंप्रतिभक्तोक्तिः ममपूर्वंनजातमीदृशंदुःखंकिंसंभाव्यतेयदद्यन
सहिष्ये अनादौसंसारेपरिभ्रमतामस्तबहुदुःखानामनुभूतत्वादितिभावः किं
तु तदीपांनांत्वदगेदुःखमितितत्वनयुक्तं कालोत्थपंनिरवधिरिति अनेनसं
भवः स्यष्टएवोक्तः भ्रातः पांथेतिकदाप्यवियुक्तस्यपांथंप्रत्युक्तिः नवेतिनन्व
तनार्थे बाढमित्यंगीकारेणोत्तरं ब्रूहीतिप्रश्नः युवतीत्यादिजीवतीत्यंतमुत्त
रं सत्यंजीवतीतिप्रश्नः पुनः पांथआह जीवतीत्यादि केचित्तुप्रपापित्सुता

© Dharmartha Trust J&K. Digitized by eGangotri

किंपिंनसंभाव्यतेइतिस्वपरामर्शेनसमाधत्तइत्याहुः अंगांगिभावस्यैकप्र
३५ धानत्वेनजयदेवेनव्यवहृतः कुसुमसौरभेति· भ्रमरीपक्षगमनवेगेनस
३५ म्रद्धशोभयेत्यर्थः यद्वाभ्रमरकृतस्वगमनवेगेनसंभृतशोभयेत्यर्थः अतए
वतथात्वरितगमनेनालकानांपुरआगमनेनदृशोश्चांचल्यं· आनंदेति आनं
देनमंथरंयथाभवतितथापुरंदरेणामुक्तानिमाल्यानिपत्रेत्यर्थः नन्वेवमपि
ल्लनाकृतीनामितिविशेषणस्यत्रमस्यनन्वयइत्यतआह अतः स्वरूपनाशे राम०
तिल्लनाकृतिपदलक्षितस्वरूपनाशेराक्ष्यार्थीकृतिलवनामेदाध्यवसाया ३५

© Dharmartha Trust J&K. Digitized by eGangotri

तिशयोक्तिमर्यादया स्वीकारे रागो रागतविशेषणार्थस्य तत्रापि सत्त्वादित्यर्थः
एवं च मुख्ये उपचरितार्थान्वयापेक्षया विशेषणे तदन्वयो युक्त इति भावः सि
ध्यत्युत्प्रेक्षेति तथा च रूपकं व्यर्थमिति भावः रूपकमिति विशेषइति· एवं चो
पायस्योपायांतराद्दूषकत्वमिति भावः पयोधरा मेघास्तनौ च· नायकः सा
रथिर्मध्यमणिश्च· एकत्वता एकावलीहारः गर्भैवोत्थाप्यत इति· अनेन स्फुट
वगम्यमेदसंरक्ष्यपेक्षया वैलक्षण्यमुक्तं· तनुदीर्घावरणावेति· तत्र तनुत्वनी
रंध्रात्वाभ्यामंगुलिमरीच्योः आवरणत्वनीलत्वाभ्यांतिमिरकेशसंचययोः दी

© Dharmartha Trust J&K. Digitized by eGangotri

३६ र्घत्वकांतिमत्वाभ्यांसरोजलोचनमोरित्याहुः सनिस्सरोद्गारः निस्सरोद्गमसरि
तः तस्मादाग्नेयेंद्रादिवदिति·एवंचचमत्कारजननेपरस्परापेक्षत्वमेवसंसृष्टि
३८ पदार्थइतिभावः दर्शपूर्णमासादिवदितिपाठांतरः शशिनमिति·एकवाक्यं
सर्वेषामेकमेववाक्यमित्यर्थः यदितेनसेतिज्ञेनसर्वनाम्ना·सा·इंदुमती·विं
वभ्रंतरइति·सचाजकर्मकंवरणं पूर्वप्रस्तावात्समेत्यादिविशेषणाच्चलभ्य
ते·संभावनामिथ्याध्यवसितिसंदेहसंकरइति·प्रौढोक्तिरप्यत्रमौक्तिकस्य राम०
लताप्रसूत्यकारणत्वेपितत्कारणत्वोक्तेरितिचंद्रालोककृततच्चिंसंतत्का ३६

© Dharmartha Trust J&K. Digitized by eGangotri

रगात्वनिश्चमस्यैवप्रौढोक्तिपदार्थत्वात्· अतएवसंभावनालंकाराद्भेदः फल
संदोहः फलसमूहः स्पष्टोद्भूतदिति· स्पष्टमुद्भूसंतः किरणाएवकेसराणिय
स्मिन्स्तच्चतत्सूर्यविंबमेवविस्तीर्णकर्णिकायस्यततस्मिष्टाच्छदिराएवदल
कलापोपस्यतच्चतन्मुखेसमारंभेवतारोयस्यतादृशवद्धांधकाररूपामधुपा
मधुपावलिर्यत्र· मत्युष्कोरति· पुष्करंकरिहस्ताग्रेवाद्यभांडमुखेजलेव्योम्नि
खड्गफलेपद्मेइत्यमरः सञ्जलशोभावतितरंगपते· सत्सम्भघोतिततरंग
शोभावतिवासत्यमप्रकाशितन्स्यमूशोभावतिच· म्दंगोवाद्यविशेषः ज

त्पध्म

© Dharmartha Trust J&K. Digitized by eGangotri

३८ ल्लेदस्ताभ्यां वादनविशेषश्च· अदोरागेति· अंबरमाकाशं वस्त्रं च· नन्वेवं विशे त्र

37 षणसाम्यायाभेदाध्यवसायापेक्षरोपि सत्युक्तोरत्यादौ शब्दसाम्येनाप्युप

पत्तेर्नैतदपेक्षेत्यत आह शब्दसाम्यस्येव शब्देति· तत्रैव वक्ष्यमाणत्वादि

ति· यतस्तथारुणा जाताश्च त एव दाडिमीबीजशंकेति प्रतीतेः तयोरेकवाच

कानुप्रवेशेति· तद्गुणकाव्यलिंगयोः तन्मूलक इति संकरमूलक इत्यर्थः ता

भ्यां चोदात्त इति· ताभ्यां संकरम्भ्रांतिमद्भ्यां· एतयोश्चाभेदकथनमिति· तस्याग राम०

लीलायितमित्यनेन· तन्मूलकस्याप्रस्तुतप्रशंसालंकारस्येति वितरणोक्त ३८

© Dharmartha Trust J&K. Digitized by eGangotri

र्षपर्यवयसापिहेत्वलंकारमूलकस्योत्कर्षः एषां च त्रयाणामिति उदात्ताति
शयोक्त्योरेकः हेत्वलंकारात्तु त्त्योरपरः व्यंग्योदात्ताप्रस्तुतप्रशंसाप्रस्तुतांकु
रामेन्यतरयोरितितरः उदात्तादिमात्रस्यैवेति उदात्तहेत्वलंकारस्य चारुतापा
दकः व्याधिभ्यां हेत्वलंकारस्याप्रस्तुतप्रशंसा चारुतापादकत्वं तत्रापि वित
रणोत्कर्षकस्य हेत्वलंकारस्यैव तादृशवितरणरूपपरिष्कारद्वारा तदन्यप्र
स्तुतराजसंपदुत्कर्षरूपप्रशंसारूपापीमप्रस्तुतप्रशंसामामंगत्वं नत्वद्भु
तातथ्यवर्णनारूपात्युक्तिसंकरस्योपेक्षेति भावः यथायोग्यसंकर इतिद्रष

© Dharmartha Trust J&K. Digitized by eGangotri

३८ त्ततद्गुणयोरंगांगिभावसंकरस्य भ्रांतिमदुदात्तयोरंगांगिभावसंकरस्य चांगां
३८ गिभावेन संकरः तथा भ्रांतिमदुत्तरयोरंगांगिभावसंकरस्योदात्तदेहलंकारादि
संदेहसंकरस्य चांगांगिभावेन संकर इति बोध्यं· नन्वेतेषां हि विन्यासा भवंत्यति
शयात्मकाः कस्याप्यतिशयस्योक्तौ इत्यन्वर्थविचारःणात प्रायेणातिशयोक्ति
क्त्या न भिन्ना इति भावः· एकजातीयरत्नानां नानासौवर्णघटनेन नानालंकार
ता लोके प्रसिद्धैव मनीषिणां· अलंकारेषु बहुषु प्रधानेष्वपि साम्यकं वै लक्ष रम०
णं प्रतिव्यक्तिप्रतिभाति मुखेष्विव· अलंकारप्रकारेषु मधुनास्यामनीषिणां ३८

© Dharmartha Trust J&K. Digitized by eGangotri

३९ त्वर्णादिरचितेनत्वेलंकारेणचशिल्पिनाकथंनजायतेनास्थासुहृदांप्रतिभाव
तामशारदागमसंभवइतिशारदागमात्संभवःप्रकाशोयस्येत्यर्थःकुवलयानंदेर
सगंगाधरोद्भावितदूषणोद्धारस्तस्मात्तरसगंगाधरमर्मप्रकाशोद्रष्टव्यः इ
तिश्रीकालोपनामकनागेशभट्टविरचितःकुवलयानंदीयविषमपदव्याख्या
रूपःषट्पदानंदाख्योग्रंथःसमाप्तः॥ ॥

राम॰
३९

© Dharmartha Trust J&K. Digitized by eGangotri

नं २९१८
कुवलयानन्दीय
विषयक वक्तव्य [illegible]
[illegible]
[illegible]

८५

८६

© Dharmartha Trust J&K. Digitized by eGangotri